# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा एप्रिल् – २०१९

| | | |
|---|---|---|
| **कक्षा – आचार्य-२ (SEM-4)** | **प्रश्नपत्रम् – ४** | **गुणाः - ७०** |
| **विषयः - नव्यन्यायः** | **CC- 5.**4.12 | **समयः – ११:०० तः २:००** |
| **दिनाङ्कः – ०२-०४-२०१९** | **ग्रन्थः – शक्तिवादः (अवशिष्टः विशेषकाण्डः)** | |

प्रथमान्वितिः (युनिट-१)

प्रश्नः -१ **द्वयोरेकस्य समाधानं सप्रसङ्गं दत्त ।** ०५

(१) 'धेनुपदस्य धानकर्मत्वविशिष्ट एव शक्तिर्न तु गोत्वमपि विशेषणमि'ति प्रभाकरमतं व्याख्यात।

(२) व्यासज्यवृत्ति-शक्यतावच्छेदकमिति मीमांसकमतमुपस्थापयत।

प्रश्नः -२ **द्वयोरेकस्य निबन्धात्मिका व्याख्या कार्या ।** १०

**(१)** धेनुपदशक्तिविचारं पूर्वपक्षसहितं निरूपयत।

**(२)** पुष्पवन्तपदस्य शक्तिः कुत्रेति सिद्धान्तं विवृणुत।

द्वितीयान्वितिः (युनिट-२)

प्रश्नः -३ **द्वयोरेकस्य उत्तरं देयम् ।** ०५

(१) 'तत्प'दस्य शक्तिविचारं प्रतिपादय।

(२) बुद्धिस्थत्वस्योपलक्षणत्वे स्वरूपतोघटत्वादिप्रकारकस्मरणानुपपत्तिं प्रतिपादयत।

प्रश्नः -४ **एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत ।** १०

(१) 'युष्मत्पदशक्ति'ग्रहविचारं निरूपयत।

(२) 'ज्ञाने' पदानां शक्तिरितिमतं प्रतिपादयत।

तृतीयान्वितिः (युनिट-३)

प्रश्नः -५ **द्वयोरेकस्य सन्दर्भव्याख्या देया।** ०५

(१) विधेयवाचककिम्पदस्य शक्तिः कुत्रेति विचारयत।

(२) अनेकत्वं सर्वपदार्थ इति मतं प्रतिपाद्य निरसत।

प्रश्नः -६ **एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत ।** १०

**(१)** 'यावत्त्वं सर्वपदार्थः' इति गदाधरमतमुपपादयत।

**(२)** किम्पदस्य शक्तिविचारं विचारयत।

चतुर्थान्वितिः (युनिट-४)

प्रश्नः -७ **एकस्य उत्तरं सन्दर्भसहितं देयम् ।** ०५

**(१)** शाब्दबोधग्रहकारणानि लिखत।

**(२)** नानार्थबोधकपदानां शक्तिः कथं गृह्यते? यथामति व्याख्यात।

प्रश्नः -८ **एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत ।** १०

(१) स्वपदस्य शक्तिः कुत्रेति स्पष्टं निरूपयत ।

(२) यथाग्रन्थं एकपदशक्तिविचारं सविस्तरं प्रतिपादयत ।

प्रश्नः -९ **दशप्रश्नानामुत्तराणि एकवाक्येन यच्छन्तु।** १०

(१) का नाम शक्तिः?

(२) पुष्पवन्तपदं कुत्र शक्तम्?

(३) किम्पदस्य कुत्र शक्तिः?

(४) वाच्यवाचकपदे धात्वर्थः कः?

(५) तत्पदस्य कुत्र शक्तिः?

(६) स्वसम्बोध्ये शक्तिः कस्य?

(७) घट-घटत्व-तत्सम्बन्धेषु त्रिषु कथमेकैव शक्तिः?

(८) ईश्वरसङ्केतः कीदृशः?

(९) शक्तिवादः कस्य कृतिर्वर्तते?

(१०) 'किंगौरि'त्यत्र किं पदस्यार्थः कः?

(११) ईश्वरसङ्केतस्य शक्तित्वे क्व शाब्दबोधानुपपत्तिः?

(१२) अन्विताभिधानवादिनः के?

(१३) सर्वपदप्रवृत्तिनिमित्तं किम्?

(१४) परोक्षबुद्धिविषये शक्तिः कस्य?

(१५) गवादिपदानां कुत्र शक्तिः?

***

# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा अप्रिल्– २०१९

| | | |
|---|---|---|
| **कक्षा – आचार्य-२ (SEM-4)** | **प्रश्नपत्रम् – ४** | **गुणाः - ७०** |
| **विषयः - नव्यन्यायः** | **CC- 5.3.9** | **समयः -** |
| **दिनाङ्कः -** | **ग्रन्थः – शक्तिवादः (अवशिष्टः विशेषकाण्डः)** | |

समाधानानि

प्रश्नः - ९

१. ईश्वरसङ्केतः।

२. दिवाकरनिशाकरयोः शक्तमेतत्पदम्।

३. जिज्ञासिते शक्तिः।

४. ईश्वरेच्छाया बोधजनकत्वेन या विषयता सा धात्वर्थः।

५. यत्पदोपस्थाप्ये शक्तिः।

६. युष्मत्पदस्य ।

७. बोधविषयत्वनिष्ठविषयतया एकैव शक्तिः।

८. अस्मात्पदादयमर्थिबोद्धव्य इति ।

९. गदाधरभट्टाचार्यस्य।

१०. कुत्सितार्थः।

११. ईश्वरानङ्गीकर्तृनये।

१२. मीमांसकाः।

१३. उद्देश्यतावच्छेदकव्यापकविधेयव्याप्यपर्याप्तिको धर्मः।

१४. अदसः।

१५. गोत्वादिविशिष्टे शक्तिः।